In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(6) MFL-981 from ~~Constanta~~ ORI University of Mysore

No- 3012
3013
3014

STUDENTS WELFARE SCHEME

जनहित

Janhit Long Exercise Book

Pages 76
(Inclusiue of Cover)

Price Rs. 2.50

Name R. S. L. Sharma

Class Ph. D Work

Subject Samskrit

Section A

College S.V.N.D. 110016

कीर्तिकान्त शर्मा / Kirtikant Sharma
सहायक आचार्य ग्रेड 2
Assistant Professor Grade II
आई.जी.एन.सी.ए., जनपथ / I G N C A, Janpath
नई दिल्ली-110001 / New Delhi-110001

Can be had from :-

UNIVERSITY ELECTROSTAT
Ram Lal Anand College
B. J. Road New Delhi

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गुप्तों के बाद की

स्तूपटारचनापदानां व्यतीति

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Ph.D. work

साम्राज्यं तव सायणाय सततं शंसन्ति साम्यासहम्।

वो कुर्षि निति सम्पत्तिनामन्योन्यमौपम्यमभिव्यज्यते॥

आदिशब्देन परिणामससंहोक्त्यादयो गृह्यन्ते रसवदादि प्रभृति

शब्देन समाहितादयः। रसादित्यादि शब्देन रसभावतदाभास

तत्प्रशमादयश्च। उल्लेखादीनां इत्यादि प्रयोगविधुरे विषये स्वयमेव

कविनैव प्रतीयमानोक्ता। इतिरूपस्यापि ध्वनेरलंकारत्वमेव

भामहादिभिरभिहितम्। सम्प्रति वामनस्य मतं प्रदर्शयति

वक्रोक्त्यलंकारतया वक्रा सादृश्यलक्षणा।
वामनेनाप्यलंकारः कथितः कश्चन ध्वनिः॥

केवलं रीतिरेवात्मा काव्यस्यानेन चोदिता॥

24. गुणविशिष्टा रचना पदानां रीतिरीरिता
~~मुख्यके~~

गुणालंकारवर्गाणां साम्यतो ध्वन्यादिभिः।

प्रोयोविषयमात्रेण भेदमाख्याय सूचितम्॥

तैर्हि शब्दार्थधर्मान् अलंकारान् इतीतः।

गुणास्संघटनाधर्मा इति ह्येतैस्समर्थितम्॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चिरन्तनानामित्येवं काव्यालंकारकारिणाम् ।
काव्येपरमलंकारः प्रधानत्वेनसम्मतः ।
वामनस्तु सादृश्याल्लक्षणावक्रोक्तिरिति वक्रोक्तिं
लक्षयित्वा " उन्मीलकमलं सरसिनी कैरवंच निमिमील
मुहूर्तमित्युदाहरणं प्रदर्श्य अत्रनेत्रधर्मान् वुन्मीलन
निमीलने सादृश्याद्विकास संकोचौ लक्ष्यते इत्युक्तवान् ।
सादृश्यंच तत्रावयव विश्लेषहेतुत्वलक्षणं । इत्थं (24)
25 इत्थं सादृश्यलक्षणया वक्रोक्त्यलंकारत्वं ब्रुवतावामनेना
विवक्षितवाच्याभ्यो ध्वनिरलंकारत्वेन कथितः । ततश्च
वामनस्यापि भामहाद्यन्तःपातित्वमेव " केवलं गुणविशिष्ट
पदरचनात्मिकारीतिरेवानेन काव्यात्मत्वेनचोदिता । उद्भटादिभि
स्तु गुणवर्गाणां संघटनाधर्मत्वेनालंकारवर्गाणां शब्दार्थ
धर्मत्वेनच प्रतिपादनात् प्रायेणसाम्यमेवसूचितं ।
तस्माद्वामनाभिमतमलंकारेभ्यो गुणानां वैशिष्ट्यं शब्दा-

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

र्धर्मात् संघटनधर्मो न व्यतिरिच्यत इति प्रतिपादने

परास्तं। तस्माद्वामनप्रभृतीनां वामनपर्यन्तानामलंकार

एव काव्ये प्रधानत्वेन सम्मतमिति युक्तम् भवति। इत्थं

धर्मविशेषप्राधान्यवादिनां मतमुपन्यस्य व्यापारप्राधान्य

वादिनोः पूर्वं कुन्तकस्य मतमुपन्यस्यति। 25 वैदग्ध्य

भङ्गी भणिति स्वभावो कुन्तकोऽभ्यधात्।

वक्रोक्तिं बहुधाभिन्नां प्राधान्यात्काव्यजीवितम्॥

व्यापारस्य प्राधान्यं काव्यस्य प्रत्यपद्यत।

अभिधायाः प्रकारस्य भेदा स्वह्यलंक्रियाः॥

प्रतीयमाने त्रिविधे विधमापि केवलं।

सम्पूर्ण

व्यापाररूप भणितिः कविसंरम्भगोचरः॥

तेनोपचार वक्रत्वमुख्यैः भेदैः प्रदर्शितैः॥

समस्तापि ध्वनेर्व्याप्ति सूचितैव पृथक् पृथक्॥

केवलं तू क्तिवैचित्र्यजीवितं काव्यमिष्यते॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

०य ङ्घार्थ जीवितं नेति तदीयं दर्शनिं स्थितम्॥

25/13 कुन्तकस्तु अलंकार्ययोश्शब्दार्थयोः कविकर्म कौशलविछित्याभणनं नाम विचित्राभिधा। वक्रोक्तिर्नामा मेव व्यापार रूपां बहुप्रकाररविद्यमानां काव्यस्य जीवितत्वेनोक्तवान् तस्माश्चाभिधायाः प्रकारविशेषा रसालंकारः उपचार वक्रतादिभि रस मस्त ध्वनि प्रपंचे स्वीकृतेपि तत्प्राधान्यं नाङ्गीकृतं। कविसंरम्भ गोचरत्वेन व्यापार एव केवलं हनन विशेषास नि प्राधान्यमंगीकृतम्। तस्मादुक्तिवैचित्र्यं जीवितं काव्यं र नव्यस्यार्थ जीवितमिति तदीयदर्शनं व्यवस्थितं तस्योपादान क्रमश्च॥

उभावेतावलंकार्यौ तयो पुनरलंकृतिः।

वक्रोक्तिरेव वैदग्ध्यभङ्गी भणितिरुच्यते॥

उभौ शब्दार्थौ। वैदग्ध्यं विदग्ध भावः। कविकर्मकौ

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

बालम्। तस्य भङ्गीविच्छित्तिः तया भणिति

विचित्रैवाभिधा वक्रोक्तिः। अयमर्थः शब्दार्थौ

पृथगवस्थितौ न केनापि व्यतिरिक्तेनालंकारेण

योज्यते। किन्तु वक्रता वैचित्र्य योगितयाभिधानमात्र

मेवानयोरलंकारः। तस्यैव शोभातिशय कारित्वादिति

व्यापार प्राधान्यमिति। तदुक्तम्॥

शब्दार्थौ सहितौ वक्रकविव्यापार शालिनि।

बन्धे व्यवस्थितौ काव्यं तद्विदाह्लाद कारिणीति॥

वक्रकविव्यापारोनाम शास्त्रादि प्रसिद्ध शब्दार्थोपनिब

न्ध व्यतिरेकवति वर्णविन्यास पदपूर्वार्ध प्रत्यय

वाक्य प्रकरण प्रबन्धात्मक षड्विधविषय वक्रता

विशिष्ट क्रिय क्रमोऽभिधीति। तथोक्तम्॥

वाक्यस्य वक्रभावोन्योभिद्यते यस्सहस्रधा।

अत्रालंकारवर्गोऽयं सर्वोऽप्यन्तर्भविष्यतीति॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

26/3

उपचारवक्रत्वमुख्यैरित्यत्र मुख्यशब्देन विशेषणवक्रतादयः परिगृह्यन्ते। उपचारवक्रत्वं नामामूर्तस्यवस्तुनो मूर्तद्रव्याभिधायिना शब्देनाभिधानं / निकारणिका दुस्तापचर्यं यथाइत्यादि एतदुभयमपि लक्षणमूलस्य ध्वनिर्विषयः संसारवारणपतिः परिमीलिताक्षमिति क्रियाविशेषणेन स्मरणसंभयजोपि सुखानुभूति सुखातिशयानुभूति प्रतीयते। अत्र पदद्योतोर्य शक्तिमूलोध्वनिः। अद्यापिमेवरतनोर्मधुराणि तस्यास्तान्यक्षराणि हृदयेकिमपि स्फुरन्तीत्यत्र किमपि विसंवृतिवक्रतया तदा वर्णनजनिता याश्चित्तजमकृतेरनुभवैक गोचरत्वं तदा गमव्यपदेश्यत्वं प्रकाश्यते। अत्रापि पूर्ववद्ध्वनिः॥ साम्प्रतं भट्टनायकस्य मतं दर्शयति॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

27 प्रौढिं इत्याग

पश्यन्त्यैव व्यापारं व्यञ्जनात्मकम्

प्रौढो न्याय पश्यन्त्यैव व्यापारं व्यञ्जनात्मकम्।

तस्य काव्ये तथात्वं ब्रुवाणो भट्टनायकः॥

अभिधाभावकत्वाख्य व्यापारद्वितयात्मकम्।

न्यक् भावयन्तं शब्दार्थौ भोगपर्यायनामकम्॥

रसैकचर्वणारूपं व्यापारं रसिकप्रियं।

प्रधानत्वेन विश्रान्तेर्भाजनं प्रत्यपादयन्॥

भट्टनायकस्तु काव्येषु ध्वनिमतानुवर्तिभिः प्रतिपाद्य

माने वस्तुध्वन्यलंकार ध्वनौ च काव्यनाम कश्चिद्व्यपा

र स्तेषां मतेऽस्ति चेदस्तु। तथापि तस्य काव्ये अंशत्व

मेव। न प्राधान्यं प्राधान्यं पुनर्मुख्यार्थं प्रतिपाद

न व्यापृत शब्दगत विभावादि साधारणीकरणशील का

भिधाभावकत्वाभिधेय व्यापारद्वितय समति क्रान्त

27/B

स्य न्यक्कृत भावित शब्दार्थस्य रसैक चर्वणारूपस्य

भोगकृत्वाख्य विश्रान्ति धाम्नो व्यापारस्यैव न तु

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

27/13

भुज्यमानस्य रसादेरिति प्रतिपादयन् । उभयोरप्य
नयोरविशिष्टेऽपि व्यापार प्राधान्ये कुन्तकस्य मते
विशिष्टाया अभिधाया एव प्राधान्यं लक्षणाव्यापारोऽपि
तस्याः पुच्छभूततया तत्रैवान्तर्भवति । भट्टनायकस्य
मते तु शास्त्रकाव्यसाधारण मुख्यलक्षणात्मकाभिधा
व्यापारातिवर्तिनं विभावादि साधारणीकरणात्मकं भाव
कत्वं नाम कमपि व्यापारं स्वीकृत्य तदुपरि न्यक् भावित
शब्दार्थं रसादिभोगकरणं रसादीनां चर्वणारूपं
भोगापरनामधेयं तृतीयमपि व्यापारं अंगीकृत्य विश्रा
न्तिधामत्वेन तस्यैव प्राधान्यमुक्तं । अत एव रसिक
प्रिय इत्युक्तं प्राक्तनेभ्यः किञ्चिदाधिक्यात् ।

28

इत्थमवधीरित ध्वनीनां भामहादीनां मतानि च वार्यु
पन्यस्य स्वयुक्तिवैधुर्येण तेषामसाधुत्वमुपपादयि
तुमानन्दवर्धनमतमुपन्यस्यति ।

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अभिधाकक्षगाभ्यांच तात्पर्याच्च पृथक् स्थितेः।
ध्वनन द्योतनादीनां वाच्यता वाच्यतान्तु वेः॥
अवश्याभ्युपगम्यत्वाद्व्यापारस्यात्मनात्मनः।
व्यापारस्यच वाक्यार्थ भागाभाव विनिर्णयान्॥
गुणालंकारोपकार्य भावेन व्यञ्जरूपिणः।
वाक्यार्थस्यैव विश्रान्ति धामत्वप्रतिपादनात्॥
प्राधान्य ध्वनिकारस्तु प्रत्यपादयदात्मताम्।
व्यावृत्तेर्विषयद्वारा स्वरूपप्रतिलम्भनात्॥
तत्प्राधान्येनैव जाताप्राधान्यस्य परिग्रहात्।
28/13 स्वरूपेण विचार्यत्वाभावासिद्धा ध्वनात्मता।
सर्वभारसोहिष्णुत्वो विषयस्यैव केवलं।
जीवितत्वेन वक्तव्यो व्यंग्यविषयस्त्वहि॥
गुणालंकारोपजातसौन्दर्य स्वीक्रियात्मकम्।
साम्राज्यं यस्य कस्यैव जीवितत्वं हि युज्यते॥

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नालङ्कारतयावाच्यावाच्यास्तस्मात्प्रभारसादयः ।

२१
प्राधान्याभावेऽप्युपस्कार्यास्तैरुपस्कारकारिभिः ॥

तद्व्यंग्य एव वाक्यार्थः काव्यजीवितमिष्यते ।

वाक्यार्थविरहेऽस्य ग्राह्यः पर्यायमेवहि ॥

व्यापारस्य व्यञ्जनस्य सर्वैरप्यनपह्नवात् ।

पर्यायान्तराप्रतिज्ञानात्तदनाश्रयणेऽपि च ॥

२५ अस्यैवातो व्यङ्ग्यनिष्ठो व्यापारो व्यञ्जनालक्षणः

काव्येनिर्दोषगुणवच्छब्दार्थे स्वाङ्गभूषिते ॥

आनन्दवर्धनाचार्यपादस्तु —

अभिधालक्षणा तात्पर्याख्य व्यापारत्रितयाति

व्यञ्जनध्वननादि शब्दवाच्य व्यापारविशेष

स्वीकारेऽपि संवृतो भामहादीन् प्रति अवत

प्रतिपादितेष्वपि पर्यायोक्ताद्यलंकारेषु

प्रतीयमानस्यार्थस्याभिधालक्षणातात्पर्याख्यै

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

व्यापारैर्दुरवगमत्वात्तदवगमसिद्ध्यर्थं ध्वनन

द्योतनादि शब्दवाच्यं व्यापारान्तरमवश्यं स्वीकर

णीयम्। तदभावे भक्तिवादिनामर्थान्तर

गम्यतोपलक्षितानां पर्यायोक्त्यादिनामुच्छेद

स्स्यात्। अतस्सव्यञ्जनव्यापारस्वीकरणीय

स इति व्यञ्जनव्यापारस्यावश्यं स्वीकार्यत्वं

२१८

प्रतिपाद्य तदुपरि व्यापारप्राधान्यवादिनामुद्दिश्य

सर्वेषां मते व्यापारस्य वाच्यार्थत्वाभावविनिर्णया

च्च व्यञ्जकरूपिणो वाक्यार्थस्यैव गुणालङ्कारोत्कर्ष

कर्तव्यत्वेन विश्रान्तिधामत्वात् प्राधान्यं। तस्मा

त्सरसता काव्यस्येति प्रसपादयत्। काव्यं तु

व्यञ्जनव्यापार प्रधानमिति हि भवता प्रतिपाद्यते

तर्हि तस्यैव व्यापारस्य प्राधान्यापादनत्वं भवतु

किमनेन व्यापारेण व्यञ्जमानस्यार्थस्य

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्राधान्यमिति विवक्षितं व्यापारप्राधान्यवादिनमु
द्दिश्य व्य~~ञ्ज~~ञ्जनव्यापारस्य विषयभूतव्यङ्ग्यमा
नार्थसमुपलम्भद्वारेणैव स्वरूपसिद्धेः प्रधान
भूततदर्थप्रतिपादनमुखेनैव स्वस्य प्राधान्य
स्वीकारात् ~~त~~ तद्व्यतिरेकेण निरूपाख्य प्रख्य
व्य~~व~~ व्यापारस्यात्मलाभं सर्वदानुपपन्नं। तर्हि
व्यापारगम्यस्यार्थस्य कथं प्राधान्यमिति चेत्
आश्रयिणस्सर्वे ह्याश्रयभूतं वस्तु समाश्रित्य
तस्मिन विन्यस्त सर्वभाराः विश्राम्यन्ति। वस्तु
आश्रयिणां भारमशेषं स्वयमुद्वहति। तद्व्या
पारस्याश्रयभूतो व्यङ्ग्यस्वार्थस्तदीयं सर्वं
भारं सहते। तस्मात् स एव काव्यस्य जीवि
तत्वेन प्रतिपादनीयः। तच्च युक्तियुक्तमिति
प्रतिपादयितुमर्थान्तरन्यासेन समर्थ्यते। यद्यपि

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भिर्गुणैर्हारादिभिरलंकारैरुपक्रियमाण

सौन्दर्य स्वीक्रियात्मकं साम्राज्यं यस्य तस्यैव

ह्यात्मत्वं युज्यते। न तु गुणानां नाप्यलंकाराणां

न च व्यापाराणां तस्मात्काव्यस्य व्यंग्यत्वे

न जीवितभूता रसादयो नालंकारत्वेन वाच्याः

तर्हि प्रधानतया अलंकार्याः। तैरलंकर्तृभिः

तस्माद् व्यंग्य एवार्थः काव्यस्य जीवितमित्युच्यते।

अपरत्वात्स्माद्वितीय पक्षो नास्यार्थ विद्भिः

सहृदयैस्सर्वैरपि गृहीतव्यश्च एवं

30/13 युक्तिमदेव समर्थितमर्थं प्रतिष्ठापयितुं

पुनरपि प्रतिपाद्य निगमयति। व्यञ्जनव्यापारस्य

सर्वैर्भामहादिभिश्चतुर्भिरप्यनपह्नवात् तदनाश्रयणे

पक्षान्तरस्याप्रतिष्ठा भूदिति व्यञ्जनव्यापारान

ङ्गीकारे पर्यायोक्ताद्यलंकारानुदय प्रसंगः। तेन

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उद्भटादि मतस्याप्रतिष्ठानादि पूर्वोक्तानपरो

स्यैव। श्रमानन्दवर्धनाचार्य पादसमार्पितेव्ये

तस्मिन् अर्थमपि जीविते कथं व्यञ्जनस्यानपह्नुत

त्वमिति कुतर्कसरिणीलि काश्चैनजल्पतो महि

म्नश्च मतमुपन्यस्य निरस्यति।

वाच्यस्य लिंगभावेन व्यज्यमानं प्रतीहतु।

व्यञ्जनस्यानुमानान्तर्भावं यन्महिमाभ्युधात्॥

आचार्यैव तल्लोक्तं तेनव्यक्ति विवेकिना।

वाच्यस्यव्यज्यमानेन न तादात्म्यतदुद्भवे॥

क्षोदनीयं कुशाग्रीयाधिषणैरत्र केवलम्।

अरोचतच्चरहनमितिनेह प्रतन्वते।॥

उक्तप्रकारेण समर्पितव्यञ्जन व्यापारसम्पृक्ता

काव्येव्यज्यमानेऽर्थं प्राप्त वाच्यस्यार्थस्य लिंग

भावमङ्गीकृत्य व्यञ्जनव्यापारस्या अनुमानान्त

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भविमाभिदृक्षौ व्यक्तिविवेककारिणामहिम्ना

अलंकारिकेण विचारविधुरमुक्तं । व्यज्यमान

मर्थं प्रतिपाद्यस्यार्थस्यानुमानप्रयोजकयोस्त

नाभ्यामुक्तयोरन्यतरासद्भावात् तादात्म्यस्य

किं वापाबाद्वृष्टान्तानुमानं वाच्यव्यंग्ययोस्तदुभय

मपिनास्ति । तदेतत् काव्यप्रकाशकारेण विविच्य

प्रतिपादितं तस्मादस्माभिरस्मिन् अलंकारशास्त्रे

तत्प्रतिपादनं कुशाग्रसदृशागूयधियैरेव

31 बोधनीयतया अतीव दुरवगाहमिति न विस्ता

रे प्रतिपाद्यत इत्युक्तं काव्यप्रकाशकारेण

पञ्चमोल्लासे संकीर्णप्रभेदनिर्णये प्रतिपादित

क्रमशस्तत् स्वावगन्तव्यः ॥ सम्प्रति प्राक्तना

लंकारिकं तन्निरस्य ध्वनिं प्रतिष्ठापयति ।

प्राधान्येन ध्वनिभूता तदेवं स्थापितो ध्वनिः ।

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निरस्य मतमन्येषाँ भालंकारिक मानिनाम् ॥

अत्र मतानां भिन्नत्वेऽपि ध्वनेरप्राधान्य विषय मैकमत्यमँगी कृत्यो क्तँ मतमिति। इत्थमालत्वेन ध्वनिं समर्थ्य तस्य प्राधान्याप्राधान्यास्फुटत्वै काव्यस्य त्रैरूप्यं प्रतिपादयति।

प्रधानगुण भावाभ्यां व्यङ्ग्यस्योत्तम मध्यमे।
काव्ये ध्वनि गुणी भूत व्यंग्य मित्युदिते उभे ॥
तस्यास्फुटत्वेलंकार प्राधान्ये काव्यमिष्यते।
चित्रशब्दार्थ विषयमधमं चित्रमित्यपि ॥

यस्मिन् काव्ये वाच्याद्व्यंग्यस्य प्राधान्यं तत्का व्यमुत्तम ध्वनिरिति च व्यपदिश्यते। यत्र पुन र्व्यंग्यो वाच्यादेरूप सर्जनी भवति तन्मध्यमं गुणीभूतव्यङ्ग्यमिति चोच्यते। यत्र तु व्यंग्यस्या स्फुटत्वं चित्रशब्दार्थ विषयालंकार प्राधान्य

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

~~अतः~~ यत्तकाव्यमधमं शब्दचित्रमर्थचित्रमिति च द्विधा प्रतिपाद्यते काव्यप्रकारेण व्यंग्यवैचित्र्य काव्यलक्षणत्वेन प्रतिपादितेऽपि भवता अस्फुट व्यंग्यमिति लक्षणं कृतमिति यदेतत्तस्य यानभिसं प्रयुक्तरसूत्रारम्भः॥

व्यङ्ग्यस्य सत्ताच्छायापि यत्र भाया क्येवास्थितिम्।
अलंकृतमलंकारैरपि काव्यं न तद्भवेत्॥

32|B यस्मिन् काव्य व्यङ्ग्यस्यास्ति वाच्छायाव्यवस्थानं भाति।
तदनेकैः अलंकारैरलंकृतमपि काव्यमेव नभवति। तदनेकैरलंकारैरलंकृतमपि काव्यमेव न भवति। तस्मात्सर्वत्र काव्यशब्द व्यपदेश हेतुरस्ति त्व च्छायामात्रेणाप्यवस्थितो व्यंग्यः। नन्वाचार्यालंकारादिः स्तदेव अभिदर्शनं दर्शयति। मुख्यामहाकवि

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गिरामलंकृतिभूतामपि प्रतीयमानच्छायैव भूषालज्जेव योषिताम्। यथा केयूरहारनूपुराद्यनेकालंकारालंकृतानामपि स्त्रीणां लज्जेव मुख्यभूषा भवति तथा चित्रयमकश्लेषाद्यनेकालंकारालंकृतानामपि महाकविगिरां प्रतीयमानार्थच्छायैव मुख्या भूषा भवति भवतु च्छायामात्रेणापि ध्वनेर्युक्ति ...

चित्रयमकश्लेषाद्यलङ्कृतिव्युत्पत्तिमात्रफले काव्ये कथं करस्माद्भवितु व्यङ्ग्यच्छायेतिगादिनां प्रयुज्यते। निर्गुणं न भवेत्। तस्मात्प्रसंनकेनापि काव्यं चित्रेप्यनुचिता। अनुपलब्धिर्नाम व्यंग्यं चित्रमीतिमता व्यंग्यस्यानन्तनिवृत्तिः काव्ये कुत्रापि नैव भवितव्यं। गुणाश्च रसधर्मा

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तस्माच्चित्रेऽपि काव्ये अनुभवता केनापि

रसेन भवितव्यम्। अन्यथा काव्यशब्द

विषयत्वाभावात्। तर्हि --- मुक्तकृत्याशां

स्याद् अनुकूलत्वादिति। अनुकूलत्वं व्यंग्यम्

अव्यंग्यमनुदराक्रान्तं यावत् तस्माद् व्यंग्यार्थ

विवित्तिः कुत्रापि काव्येनेष्यते। ---

द्वितीयचित्रकाव्ये व्यंग्यार्थच्छायानुवृत्तिः

तथालंकारे उत्तमकाव्ये ध्वनावप्यलंकार

33/B

छायानुवृत्तिरस्त्येव - अन्यत्र तु यद्वालंकारे

तथालङ्कारवासनाऽप्याख्यातम्। इत्थं त्रैरूप्येण

प्रतिपादिते काव्ये ध्वनिगतत्वेन या प्रतिपाद्य

मानानामाश्रयभूतस्य शब्दस्यार्थस्य वा प्रा

धान्येन व्यपदेशोऽपि तत्र स्वस्यापि उपसर्जन

त्वेनोपक --- वस्तुनोरेकस्यैवैकत्र कार्य

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कारित्वेपि तस्याविनाभावेन तत्रसहकारिभावोयु

ज्यत इति प्रतिपादयति। शब्दार्थाभ्यन्तरायत्वं

यत्रध्वनिचित्रयोः प्राधान्यं तत्र तस्यस्यागुणिभाव

परस्यतु ध्वनिचित्रयोरिति गुणिभू ~~त~~ तव्यङ्ग्य

स्याप्युपलक्षणम्। अन्यव्याख्यातम्। एतदेव

समर्थ्यते सामान्येन।

एकस्य कारकत्वेपि नित्यसम्बन्धयोर्द्वयोः
परस्य सहकारित्वं युज्यते सर्वकर्मसु॥

सर्वकर्मसु लौकिकेषु भूषणविलेपन तिलक

ताम्बूल ग्रहणादिषु दक्षिणवाम करयोरिव अन्य

त्रापि कर्मसु वह्निमारुत तयोरिव अन्यव्या

ख्यातं॥ यत्रध्वन्यावलंकारेवा समुदितौ

शब्दार्थयोरुभयोरपि निष्पादकत्वेन प्राधान्यं

सम्प्रतीयते। तस्यध्वनेरलंकारस्य च उभय

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एतत्त्वमेव प्रतिपादयिष्यामीति प्रतिपादयति।
तयोर्द्वयोश्च प्राधान्यं समं यत्र प्रतीयते।
अतः भयवत्त्वेन स्थापनीयं
न संशयः॥
सामान्य निर्देशमपुंसकस्संस्कारः। दोष
गुणालंकाराणां व्यंग्यस्यापि शब्दार्थायत्त
त्वेन समाने कथं ध्वनेरात्मत्वमित्याशंक्य
परिहरति। 34/B.

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

CC0. In Public Domain Bharatiya Vidya Bhawan, New Delhi Collection